# Shri Dayananda Ashtakam

# श्रीदयानन्दाष्टकम्

## Document Information

Text title : dayAnandAShTakam

File name : dayAnandAShTakam.itx

Category : deities_misc, puShpAshrIvatsan, gurudev, aShTaka

Location : doc_deities_misc

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Dayananda Stotravali

Latest update : March 24, 2018

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

September 26, 2021

*sanskritdocuments.org*

# श्रीदयानन्दाष्टकम्

ॐ

श्रीरामजयम् ।

ॐ सद्गुरुश्रीत्यागराजस्वामिने नमो नमः ।

अथ श्रीदयानन्दाष्टकम् ।

सरस्वतीकृपापात्रं दयानन्दसरस्वतीम् ।
यतिश्रेष्ठगुरुं वन्दे दयार्द्राक्षं स्मिताननम् ॥ १॥

वेदान्तसारसद्बोधं लोकसेवनसुव्रतम् ।
दयानन्दगुरुं वन्दे दयार्द्राक्षकृपाकरम् ॥ २॥

गीतासारोपदेशं च गीतसत्कविताप्रियम् ।
दयानन्दगुरुं वन्दे दयाङ्कितसुभाषितम् ॥ ३॥

अद्वैतबोधकं वन्दे विशिष्टाद्वैतबोधकम् ।
दयानन्दगुरुं वन्दे दयार्द्राननसान्त्वनम् ॥ ४॥

दयाकूटं तपस्कूटं विद्याकूटविराजकम् ।
दयानन्दगुरुं वन्दे दयादिसुगुणाश्रयम् ॥ ५॥

गङ्गातीरप्रबोधं च गङ्गापारतपस्स्थलम् ।
दयानन्दगुरुं वन्दे दयागङ्गास्रवास्रवम् ॥ ६॥

परमार्थगुरुं वन्दे तत्त्वबोधनतल्लजम् ।
श्रीदयानन्दशिष्यार्यं शान्तसत्त्वगुणास्पदम् ॥ ७॥

भारतश्रेष्ठरत्नं च सर्वलोकसुकीर्तितम् ।
दयानन्दगुरुं वन्दे अष्टकश्लोककीर्तितम् ॥ ८॥

गीतस्तोत्रप्रमोदाय ज्ञानाचार्याय मङ्गलम् ।
वेदशास्त्रप्रवीणाय दयानन्दाय मङ्गलम् ॥

त्यागराजगुरुस्वामिशिष्यापुष्पाभिलेखनम् ।
दयानन्दगुरुस्तोत्रं पठनीयं शुभप्रदम् ॥

इति सद्गुरुश्रीत्यागराजस्वामिनः शिष्यया भक्तया पुष्पया कृतं श्रीदयानन्दाष्टकं गुरौ समर्पितम् ।
ॐ शुभमस्तु ।

Footnote Verse 4 विशिष्टाद्वैतबोधकम् The distinguished teacher of Advaita

Encoded and proofread by N V Vathsan nvvathsan at gmail.com

Copyright Pushpa Srivatsan

*Shri Dayananda Ashtakam*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on September 26, 2021

Please send corrections to *sanskrit@cheerful.com*